श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री घटिकाचलहनुमत्स्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री घटिकाचलहनुमत्स्तोत्रम् ॥

शङ्खचक्रधरं देवं घटिकाचलवासिनम्।
योगारूढं ह्याञ्जनेयं वायुपुत्रं नमाम्यहम्॥ १ ॥

भक्ताभीष्टप्रदातारं चतुर्बाहुविराजितम्।
दिवाकरद्युतिनिभं वन्देऽहं पवनात्मजम्॥ २ ॥

कौपीनमेखलासूत्रं स्वर्णकुण्डलमण्डितम्।
लङ्घिताब्धिं रामदूतं नमामि सततं हरिम्॥ ३ ॥

दैत्यानां नाशनार्थाय महाकायधरं विभुम्।
गदाधरकरो यस्तं वन्देऽहं मारुतात्मजम्॥ ४ ॥

नृसिंहाभिमुखो भूत्वा पर्वताग्रे च संस्थितम्।
वाञ्छन्तं ब्रह्मपदवीं नमामि कपिनायकम्॥ ५ ॥

बालादित्यवपुष्कं च सागरोत्तारकारकम्।
समीरवेगं देवेशं वन्दे ह्यमितविक्रमम्॥ ६ ॥

पद्मरागारुणमणिशोभितं कामरूपिणम्।
पारिजाततरुस्थं च वन्देऽहं वनचारिणम्॥ ७ ॥

रामदूत नमस्तुभ्यं पादपद्मार्चनं सदा।
देहि मे वाञ्छितफलं पुत्रपौत्रप्रवर्धनम्॥ ८ ॥

इदं स्तोत्रं पठेन्नित्यं प्रातः काले द्विजोत्तमः।
तस्याभीष्टं ददात्याशु रामभक्तो महाबलः॥ ९ ॥

॥ इति श्री घटिकाचलहनुमत्स्तोत्रं संपूर्णम्॥

www.prapatti.com